# Devakritam Sankashtanashanam Ganesha Stotram

# દેવાકૃતં સઙ્કષ્ટનાશનં ગણેશસ્તોત્રમ્

## Document Information

Text title : Devakritam Sankashtanashanam Ganesha Stotram

File name : sankaShTanAshanaMgaNeshastotramdevAkRRitam.itx

Category : ganesha, gaNeshapurANa

Location : doc_ganesha

Proofread by : Preeti Bhandare

Description/comments : shrIgaNeshapurANaM upAsanA (pUrva)khaNDaH | adhyAya 40 | 1.40 42-56||

Latest update : April 20, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

# દેવાકૃતં સઙ્કષ્ટનાશનં ગણેશસ્તોત્રમ્

દેવા ઊચુઃ ।
નમો નમસ્તે પરમાર્થરૂપ ! નમો નમસ્તેઽખિલકારણાય ।
નમો નમસ્તેઽખિલકારકાય સર્વેન્દ્રિયાણામધિવાસિનેઽપિ ॥ ૪૨॥

નમો નમો ભૂતમયાય તેઽસ્તુ નમો નમો ભૂતકૃતે સુરેશ ! ।
નમો નમઃ સર્વધિયાં પ્રબોધ ! નમો નમો વિશ્વલયોદ્ભવાય ॥ ૪૩॥

નમો નમો વિશ્વભૃતેઽખિલેશ ! નમો નમઃ કારણકારણાય ।
નમો નમો વેદવિદામદૃશ્ય ! નમો નમઃ સર્વવરપ્રદાય ॥ ૪૪॥

નમો નમો વાગવિચારભૂત ! નમો નમો વિઘ્નનિવારણાય ।
નમો નમોઽભક્તમનોરથઘ્ન ! નમો નમો ભક્તમનોરથજ્ઞ ॥ ૪૫॥

નમો નમોઽભક્તમનોરથેશ ! નમો નમો વિશ્વવિધાનદક્ષ ! ।
નમો નમો દૈત્યવિનાશહેતો ! નમો નમઃ સઙ્કટનાશકાય ॥ ૪૬॥

નમો નમઃ કારુણિકોત્તમાય નમો નમો જ્ઞાનમયાય તેઽસ્તુ ।
નમો નમોઽજ્ઞાનવિનાશનાય નમો નમો ભક્તવિભૂતિદાય ॥ ૪૭॥

નમો નમોઽભક્તવિભૂતિહન્ત્રે નમો નમો ભક્તવિમોચનાય ।
નમો નમોઽભક્ત વિબન્ધનાય નમો નમસ્તે પ્રવિભક્તમૂર્તે ॥ ૪૮॥

નમો નમસ્તત્ત્વવિબોધકાય નમો નમસ્તત્ત્વવિદુત્તમાય ।
નમો નમસ્તેઽખિલકર્મસાક્ષિણે નમો નમસ્તે ગુણનાયકાય ॥ ૪૯॥

બ્રહ્મોવાચ ।
એવં સ્તુતઃ સુરૈર્દેવો દ્વિરદાનન ઈશ્વરઃ ।
ઉવાચ પરમપ્રીતો હર્ષયત્ સુરસત્તમાન્ ॥ ૫૦॥

ગણેશ ઉવાચ ।
સ્તોત્રેણ તપસા ચૈવ સુરાઃ સન્તુષ્ટિમાગતઃ ।

દદામિ સકલાભીષ્ટં તદ્ વૃણુધ્વં સુરેશ્વરાઃ ॥ ૫૧॥

દેવા ઊચુઃ ।
યદિ તુષ્ટોઽસિ દેવેશ ! ત્રિપુરં જહિ દાનવમ્ ।
સર્વેષામધિકારાન્ નો ગૃહીત્વા યસ્તુ તિષ્ઠતિ ॥ ૫૨॥

ત્વયૈવાસ્યાભયં દત્તં સર્વામરસમૂહતઃ ।
અતઃ સ્મ સઙ્કટં પ્રાપ્તાઃ સઙ્કટાન્ મોચયાઽઽશુ નઃ ॥ ૫૩॥

ત્વામેવ શરણં પ્રાપ્તા એષ એવ વરો હિ નઃ ।
ગણેશ ઉવાચ ।
વારયિષ્યે ભયં સર્વં તસ્માદ્ ઘોરતરાદ્ હિ વઃ ॥ ૫૪॥

ભવત્કૃતમિદં સ્તોત્રમતિપ્રીતિકરં મમ્ ।
સઙ્કષ્ટનાશનમિતિ વિખ્યાતં ચ ભવિષ્યતિ ॥ ૫૫॥

પઠતાં શ◌ૃણ્વતાંચૈવ સર્વકામપ્રદં નૃણામ્ ।
ત્રિસન્ધ્યં યઃ પઠેદેતત્ સઙ્કષ્ટં નાપ્નુયાત ક્વચિત્ ॥ ૫૬॥

ઇતિ દેવાકૃતં સઙ્કષ્ટનાશનં ગણેશસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીગણેશપુરાણં ઉપાસના (પૂર્વ)ખણ્ડ । અધ્યાય ૪૦ । ૧.૪૦ ૪૨-૫૬॥

- .. shrIgaNeshapurANaM upAsanA (pUrva)khaNDa . adhyAya 40 . 1.40 42-56..

Proofread by Preeti Bhandare

---

*Devakritam Sankashtanashanam Ganesha Stotram*

pdf was typeset on April 20, 2024

Please send corrections to *sanskrit@cheerful.com*